# શિવાષ્ટકમ્

પ્રભુમ્ પ્રાણનાથમ્ વિભુમ્ વિશ્વનાથમ્
જગન્નાથમ્ સદાનન્દભાજમ્ |
ભવદભવ્યભૂતેશ્વરમ્ ભૂતનાથં
શિવમ્ શંકરમ્ શમ્ભુમીશાનમીડે || ૧ ||

ગલે રુણ્ડમાલમ્ તનૌ સર્પજાલમ્
મહાકાલકાલમ્ ગણેશાધિપાલમ્ |
જટાજૂટગંગોત્તરઅગૈર્વિશાલમ્
શિવમ્ શંકરમ્ શમ્ભુમીશાનમીડે || ૨ ||

મુદામાકરમ્ મંડનમ્ મંડયન્તમ્
મહામંડલમ્ ભસ્મભૂષાધરન્તમ્ |
અનાદિમ્ હ્યપારમ્ મહામોહમારમ્
શિવમ્ શંકરમ્ શમ્ભુમીશાનમીડે || ૩ ||

તટાધોનિવાસમ્ મહાટ્ટટ્ટહાસમ્
મહાપાપનાશમ્ સદા સુપ્રકાશમ્ |
ગિરિશમ્ ગણેશમ્ સુરેશમ્ મહેશમ્
શિવમ્ શંકરમ્ શમ્ભુમીશાનમીડે || ૪ ||

ગિરિન્દ્રાત્મજાસડગૃહીતાર્ધદેહમ્
ગિરૌ સંસ્થિતમ્ સર્વદાસન્નગેહમ્ |
પરબ્રહ્મ બ્રહ્માદિભિર્વન્ધમાનમ્
શિવમ્ શંકરમ્ શમ્ભુમીશાનમીડે || ૫ ||

કપાલમ્ ત્રિશૂલમ્ કરાભ્યામ્ દધાનમ્
પદામ્ભોજનમ્રાય કામમ્ દધાનમ્ |
બલીવર્દયાનમ્ સુરાણામ્ પ્રધાનમ્
શિવમ્ શંકરમ્ શમ્ભુમીશાનમીડે || ૬ ||

શરચ્ચન્દ્રગાત્રમ્ ગુણાનન્દપાત્રમ્
ત્રિનેત્રમ્ પવિત્રમ્ ધનેશસ્ય મિત્રમ્ |
અપર્ણાકલત્રમ્ ચરિત્રમ્ વિચિત્રમ્
શિવમ્ શંકરમ્ શમ્ભુમીશાનમીડે || ૭ ||

હરમ્ સર્પહારમ્ ચિતાભૂવિહારમ્
ભવમ્ વેદસારમ્ સદા નિર્વિકારમ્ ।
શ્મશાને વસન્તમ્ મનોજમ્ દહન્તમ્
શિવમ્ શંકરમ્ શમ્ભુમીશાનમીડે ॥ ૮ ॥

સ્તવમ્ યઃ પ્રભાતે નરઃ શૂલપાણેઃ
પઠેત્સર્વદા ભર્ગભાવાનુરક્તઃ ।
સ પુત્રમ્ ધનમ્ ધાન્યમિત્રમ્ કલત્રમ્
વિચિત્રમ્ સમાસાદ્ય મોક્ષમ્ પ્રયાતિ ॥ ૯ ॥

*************